"भल्लातकं त्रिषु प्रोक्तमरुष्कोऽरुष्करोऽग्निकः ।
तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

भल्लुकः, पुं, ( भल्लूक+पृषोदरादित्वात् ह्रस्वः । ) भालूकः । इत्यमरः ॥

भल्लूकः, पुं, (भल्लते इति । भल्ल+"उलूकादयश्च ।" उणा० ४ । ४१ । इति ऊकप्रत्ययेन साधुः । ) जन्तुविशेषः । भालूक इति भाषा । तत्पर्य्यायः । ऋक्षः २ भल्लः ३ अच्छभल्लः ४ दुर्घोषः ५ भल्लुकः ६ पृष्ठहरिः ७ द्राघिष्ठः ८ दीर्घकेशः ९ चिरायुः १० दुश्चरः ११ दीर्घदर्शी १२ । इति राजनिर्घण्टः ॥ भालुकः १३ भालूकः १४ अच्छः १५ भाल्लूकः १६ भौलूकः १७ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १२ । ११६ । ६ ।
"सिंहव्याघ्रगणाः क्रूरा मत्ताश्चैव महागजाः ।
द्वीपिनः खड्गभल्लूका ये चान्ये भीमदर्शनाः ॥"
कोशस्थप्राणिविशेषः । तद्यथा,—
"शङ्खशङ्खनखशुक्तिशम्बूकभल्लूकप्रभृतयः कोशस्थाः ।" इति सुश्रुते सूत्रस्थाने ४६ अध्यायः ॥)
श्योनाकप्रभेदः । ( यथास्य पर्य्यायः ।
"श्योनाको भूतपुष्पश्च पूतिवृक्षो सुनिद्रुमः ।
दीर्घवृन्तश्च कट्वङ्गो भल्लूकस्तुण्टकोऽरलुः ॥"
इति वैद्यकरत्नमाला ॥)
कुक्कुरः । इति राजनिर्घण्टः ॥

भव्यं, क्ली, (भवति भूयते वा । भू+अच् अप् वा ।) भव्यम् । इति राजनिर्घण्टः ॥ चालता । इति भाषा ॥

भवः, पुं, (भूयते इति । भू+भावे अप् ।) जन्म । ( यथा, याज्ञवल्क्ये । ३ । १६४ ।
"भवो जातिसहस्रेषु प्रियाप्रियविपर्य्ययः ॥"
भवत्यस्मादिति । भू+अपादाने अप् । शिवः । इत्यमरः ॥ यथा, शतपथब्राह्मणे ।६।१।३।१५।
"तमब्रवीद् भवोऽसीति तद्यदस्य तन्नामाकरोत्पर्ज्जन्यस्तद्रूपमभवत् पर्ज्जन्यो वै भवः ॥")
स च जलमूर्त्तिः । यथा,—
"भवाय जलमूर्त्तये नमः ।"
इति पार्थिवशिवलिङ्गपूजाप्रयोगः ॥
( भवति प्रभवत्यनेनेति । भू+अप् ।) क्षेमः । ( यथा, महाभारते । १ । २२१ । २८ ।
"को हि नाम भवेनार्थी साहसेन समाचरेत् ॥"
भवति उत्पद्यतेऽस्मिन्निति । भू+आधारे अप् ।) संसारः । (यथा, मार्कण्डेये । ११ । ७ ।
"अनघत्वं तथैवेयं देवी सर्व्वभवारणिः ॥")
सत्ता । प्राप्तिः । इति मेदिनी ॥

भवकः, पुं, ( भवतादिति । भू+वुन् । ) आशीर्व्वाचकः । इति संक्षिप्तसारः ॥

भवघस्मरः, पुं, ( भवस्य वनस्य घस्मरः ध्वंसकारकः । ) दावानलः । इति शब्दमाला ॥

भवत्, त्रि, ( भाति विद्यते इति । भा+डवतुप्रत्ययः । ) युष्मदर्थम् । अत्र भाधातोर्डवतुप्रत्ययेन निष्पन्नम् । तस्य लिङ्गत्रये रूपम् । भवान् भवती भवत् । ( यथा, मार्कण्डेये देवीमाहात्म्ये । ८५ । ५ ।
"भवतीं नाशयिष्यामि तत्क्षणात् परमापदः ॥")
वर्त्तमानार्थम् । इति मेदिनी । ते, १३७ ॥ अत्र भूधातोः शतृप्रत्ययेन निष्पन्नम् । तस्य लिङ्गत्रये रूपं भवन् भवन्ती भवत् ॥ ( यथा, मनौ । १२ । ९७ ।
"चातुर्व्वर्ण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक् ।
भूतं भवद्भविष्यच्च सर्व्वं वेदात् प्रसिध्यति ॥")

भवती, स्त्री, ( भवत्+ङीप् । ) वाणभेदः । स तु विषाक्तः । इति शब्दरत्नावली ॥ दीप्तिमती । यथा । वाल्मीकिकृतगङ्गास्तोत्रम् ।
"स्वर्गारोहणवैजयन्ति भवतीं भागीरथीं प्रार्थये ॥"

भवदारु, क्ली, (भवाख्यं भवप्रियं वा दारु । ) देवदारुवृक्षः । इति राजनिर्घण्टः ॥

भवदीयं, त्रि, (भवत्+"भवतष्ठक्छसौ ।" ४।२।११५ । इति छस् । ) भवत इदम् । युष्मत्सम्बन्धि । यथा, उद्भटे ।
"श्रुत्वातिदूरे भवदीयकीर्त्तिं
कर्णौ च तुष्टौ न च चक्षुषी मे ।
द्वयोर्विवादं परिहर्त्तुमिच्छन्
समागतोऽहं तव दर्शनाय ॥"
( यथा, भागवते । ९ । १८ । ३९ ।
"वयसा भवदीयेन रंस्ये कतिपयाः समाः ॥")

भवनं, क्ली, ( भवत्यस्मिन्निति । भू+अधिकरणे ल्युट् । ) गृहम् । ( यथा, मनौ । ११ । १८ ।
"स त्वम् तं घटं प्राप्य प्रविश्य भवनं स्वकम् ॥"
प्रासादः । यथा, महाभारते ।३।५४।१३ ।
"देवराजस्य भवनं विविशाते सुपूजितौ ॥"
भू+भावे ल्युट् ।) भावः । इति मेदिनी ॥ (यथा,
"ननु प्रागसतो घटस्य भवनं दृश्यते ॥"
इति तार्किकाः ॥)

भवनाशिनी, स्त्री, ( भवं संसारं जन्मादिकं वा नाशयति उत्सारयति नाशयितुं शीलमस्येति वा । नश+णिच्+णिनिः ।) सरयूनदी । इति पुराणम् ॥

भवनीयं, त्रि, (भवितुमर्हमिति । भू+अनीयर ।) भवितव्यम् । भव्यम् । उत्पत्त्यर्हम् । इति मुग्धबोधव्याकरणम् ॥

भवन्तः, पुं, (भवत्यत्रेति । भू+"तॄभूवहिवसीति ।" उणा० ३।१२८ । इति झच् । स च चिद्भवति ।) कालभेदः । स तु वर्त्तमानः । इत्युणादिकोषः ॥ ( भान्ति इति । भा+डवतु प्रत्ययः । ) भवच्छब्दस्य प्रथमाबहुवचनान्तरूपोऽप्ययम् ॥ (यथा, महाभारते । ३ । ५४ । २ ।
"के वै भवन्तः कश्चासौ यस्याहं दूत ईप्सितः ॥")

भवन्तिः, पुं, ( भू+"सुवो भिच् ।" उणा० ३ । ५० । इति भिच् । ) वर्त्तमानकालः । इत्युणादिकोषः संक्षिप्तसारोणादिवृत्तिश्च ॥

भवभूतिः, पुं, ( भवेन शिवेन भूतिरैश्वर्य्यादिकं यस्य भव एव भूतिर्यस्येति वा । शिवोपासनयैवास्य विद्यादुत्पत्तेस्तथात्वम् । ) कविविशेषः स च भोजराजस्य पण्डितः । मालतीमाधवादिनाटककर्त्ता च । तत्पर्य्यायः । भूगर्भः २ । इति जटाधरः ॥ ( यथा, राजतरङ्गिण्याम् । ४ । १४४ ।
"कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः ॥"
भवस्य महादेवस्य भूतिरिति विग्रहे तु । ) महादेवस्य ऐश्वर्य्यञ्च ॥

भवरुत्, [ द् ] स्त्री, ( भवे जन्मादिप्रदे संसारे रोदिति अनेनेति भवे जन्मान्ते रोदित्यनेन वेति । रुद्+क्विप् । ) प्रेतपटहः । इति त्रिकाण्डशेषः ॥

भवात्मजा, स्त्री, ( भवस्य शिवस्य आत्मजेति । ) मनसादेवी । इति शब्दमाला ॥

भवादृक्, भवादृशः, भवादृशः [ श् ] त्रि, युष्मत्सदृशः । भवानिव दृश्यते य इति व्युत्पत्त्या भवच्छब्दपूर्व्वकदृशधातोः कर्म्मणि क्रमेण क्विप्टक्सक्प्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

भवानी, स्त्री, भवस्य भार्य्या । ( भव+"इन्द्रवरुणभवशर्व्वेति ।" ४ । १ । ४९ । इति स्त्रियां ङीष् ततः आनुक् चागम इति । ) दुर्गा । इत्यमरः ।१।१।३१॥ एतन्नामकारणं यथा,—
"रुद्रो भवः समाख्यातो भवः संसारसागरः ।
भयः कामस्तथा वृद्धिर्भवानी परिकीर्त्तिता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
( यथा, हरिवंशे भविष्यपर्व्वणि । १६ । ६ ।
"भवानी तत्र मे देव ! परिचर्त्तुं सदाभवत् ॥") ।

भवानीगुरुः, पुं, (भवान्याः शिवपत्न्या गुरुः पिता । ) हिमालयपर्व्वतः । इति हेमचन्द्रः ॥

भवाभीष्टः, पुं, ( भवे अभीष्टः । ) गुग्गुलुः । इति राजनिर्घण्टः ॥

भवाब्धिः, पुं, ( भवः अब्धिरिवेत्युपमितसमासः । भव एव अब्धिर्वा ।) संसाररूपसमुद्रः । यथा,
"ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ! ते चरणारविन्दम् ॥"
इति श्रीभागवते ११ स्कन्धे ५ अध्यायः ॥

भवायना, स्त्री, ( भवः शिव एवायनमाश्रयस्थलमस्याः । शिवशिरसि स्थितत्वादस्यास्तथात्वम् ।) गङ्गा । इति शब्दरत्नावली ॥ ( भवायनीत्यपि ॥ )

भविकं, क्ली, ( भवः प्रभाव ऐश्वर्य्यादिकमित्यर्थः उत्पाद्यत्वेनास्त्यस्येति ठन् ।) मङ्गलम् । तद्वति त्रि । इत्यमरः ॥

भवितः, त्रि, ( भवो मङ्गलं जातोऽस्येति तारकादित्वात् इतच् । ) अतीतोत्पत्तिकः । भूतः । इति जटाधरः ॥

भवितव्यं, त्रि, भवनीयम् । भव्यम् । इति भविष्यत्काले कर्म्मणि भावे शक्यार्हप्रैष्यानुज्ञाप्राप्तकालार्थे च भूधातोस्तव्यप्रत्ययेन निष्पन्नम् । इति व्याकरणम् ॥ यथा, वह्निपुराणे ।